# Narayanakritam Rudra Stotram

# नारायणकृतं रुद्रस्तोत्रम्

## Document Information

Text title : Narayanakritam Rudra Stotram

File name : nArAyaNakRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 172/66-73||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

Narayanakritam Rudra Stotram

# नारायणकृतं रुद्रस्तोत्रम्

त्वत्सम्भूता भूतकृतो वरेण्य गोप्तारोऽद्य भुवनं पूर्वदेवाः ।
आविश्येमां धरणीं येऽभ्यरक्षन्पुरा पुराणां तव देव सृष्टिम् ॥ ६६॥

सुरासुरान्नागरक्षःपिशाचान्नरान्सुपर्णानथ गन्धर्वयक्षान् ।
पृथग्विधान्भूतसङ्घांश्च विश्वांस्त्वत्सम्भूतान्विद्म सर्वांस्तथैव ।
ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं मैत्रं त्वाष्ट्रं कर्म सौम्यं च तुभ्यम् ॥ ६७॥

रूपं ज्योतिः शब्द आकाशवायुः स्पर्शः स्वाद्यं सलिलं गन्ध उर्वी ।
कामो ब्रह्मा ब्रह्म च ब्राह्मणाश्च त्वत्सम्भूतं स्थास्नु चरिष्णु चेदम् ॥ ६८॥

अद्भ्यः स्तोका यान्ति यथा पृथक्त्वं ताभिश्चैक्यं सङ्क्षये यान्ति भूयः ।
एवं विद्वान्प्रभवं चाप्ययं च हित्वा भूतानां तत्र सायुज्यमेति ॥ ६९॥

दिव्यावृतौ मानसौ द्वौ सुपर्णाववावशाखः पिप्पलः सप्त गोपाः ।
दशाप्यन्ये ये पुरं धारयन्ति त्वया सृष्टास्ते हि तेभ्यः परस्त्वम् ॥ ७०॥

भूतं भव्यं भविता चाप्यधृष्यं त्वत्सम्भूता भुवनानीह विश्वा ।
भक्तं च मां भजमानं भजस्व मा रीरिषो मामहिताहितेन ।
आत्मानं त्वामात्मनोऽनन्यभावो विद्वानेवं गच्छति ब्रह्म शुक्रम् ॥ ७१॥

अस्तौषं त्वां तव सम्मानमिच्छन्विचिन्वन्वै सवृषं देववर्य ।
सुदुर्लभान्देहि वरान्ममेष्टानभिष्टुतः प्रतिकार्षीश्च मा माम् ॥ ७२॥

तस्मै वरानचिन्त्यात्मा नीलकण्ठः पिनाकधृक् ।
अर्हते देवमुख्याय प्रायच्छदृषिसंस्तुतः ॥ ७३॥

इति महाभारते द्रोणपर्वणि १७२ अध्यायान्तर्गतं
नारायणकृतं रुद्रस्तोत्रं सम्पूर्णम् ।

महाभारत । द्रोणपर्व । अध्याय १७२/६६-७३॥

mahAbhArata . droNaparva . adhyAya 172/66-73..

Proofread by PSA Easwaran

*Narayanakritam Rudra Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*